# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय ५२

ततः सुमन्त्रस्त्वागम्य राघवं वाक्यमब्रवीत् ।
एते निवारिता राजन्द्वारि तिष्ठन्ति तापसाः ॥१॥

भार्गवं च्यवनं नाम पुरस्कृत्य महर्षयः ।
दर्शनं ते महाराज चोदयन्ति कृतत्वराः ।
प्रीयमाणा नरव्याघ्र यमुनातीरवासिनः ॥ २॥

तस्य तद्वचनं श्रुत्वा रामः प्रोवाच धर्मवित् ।
प्रवेश्यन्तां महात्मानो भार्गवप्रमुखा द्विजाः ॥ ३॥

राज्ञस्त्वाज्ञां पुरस्कृत्य द्वाःस्थो मूर्ध्नि कृताञ्जलिः ।
प्रवेशयामास ततस्तापसान्संमतान्बहून् ॥ ४॥

शतं समधिकं तत्र दीप्यमानं स्वतेजसा ।
प्रविष्टं राजभवनं तापसानां महात्मनाम् ॥ ५॥

ते द्विजाः पूर्णकलशैः सर्वतीर्थाम्बुसत्कृतम् ।
गृहीत्वा फलमूलं च रामस्याभ्याहरन्बहु ॥ ६॥

प्रतिगृह्य तु तत्सर्वं रामः प्रीतिपुरस्कृतः ।
तीर्थोदकानि सर्वाणि फलानि विविधानि च ॥ ७॥

उवाच च महाबाहुः सर्वानेव महामुनीन् ।
इमान्यासनमुख्यानि यथार्हमुपविश्यताम् ॥ ८॥

रामस्य भाषितं श्रुत्वा सर्व एव महर्षयः ।
बृसीषु रुचिराख्यासु निषेदुः काञ्चनीषु ते ॥ ९॥

उपविष्टानृषींस्तत्र दृष्ट्वा परपुरञ्जयः ।
प्रयतः प्राञ्जलिर्भूत्वा राघवो वाक्यमब्रवीत् ॥ १०॥

किमागमनकर्यं वः किं करोमि तपोधनाः ।
आज्ञाप्योऽहं महर्षीणां सर्वकामकरः सुखम् ॥ ११॥

इदं राज्यं च सकलं जीवितं च हृदि स्थितम् ।
सर्वमेतद्द्विजार्थं मे सत्यमेतदब्रवीमि वः ॥ १२॥

तस्य तद्वचनं श्रुत्वा साधुवादो महानभूत् ।
ऋषीणामुग्रतपसां यमुनातीरवासिनाम् ॥ १३॥

ऊचुश्च ते महात्मानो हर्षेण महतान्विताः ।
उपपन्नं नरश्रेष्ठ तवैव भुवि नान्यतः ॥ १४॥

बहवः पार्थिवा राजन्नतिक्रान्ता महाबलाः ।
कार्यगौरवमश्रुत्वा प्रतिज्ञां नाभ्यरोचयन् ॥ १५॥

त्वया पुनर्ब्राह्मण गौरवादियं
कृत्वा प्रतिज्ञा ह्यनवेक्ष्य कारणम् ।
कुरुष्व कर्ता ह्यसि नात्र संशयो
महाभयात्त्रातुमृषींस्त्वमर्हसि ॥ १६॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com